कर्णक्ष्वेडन्तु पित्तादियुक्तेन वातेन जन्यते तत्र नियमेन वेणुघोषमिव शृणोतीति भेदः ॥ * ॥

कर्णस्रावमाह ।

"शिरोऽभिघातादथवा निमज्जतो
जलप्रपाकादथवापि विद्रधेः ।
स्रवेद्धि पूयं श्रवणोऽनिलादितः
स कर्णसंस्राव इति प्रकीर्त्तितः" ॥

पूयमित्युपलक्षणं जलं रसञ्च स्रावयेत् ॥
श्रवणशब्दः पुंलिङ्गोऽप्यस्ति ॥ * ॥ कर्णकण्डूमाह ।
"मारुतः कफसंयुक्तः कर्णे कण्डूं करोति हि" ॥*॥

कर्णगूथमाह ।

"पित्तोष्मशोषितः श्लेष्मा कुरुते कर्णगूथकम्" ॥
कर्णे गूथं यस्मात् स कर्णगूथव्याधिः ॥ * ॥

प्रतिनाहमाह ।

"स कर्णगूथो द्रवतां यदा गतो
विलापितो घ्राणमुखं प्रपद्यते ।
तदा स कर्णप्रतिनाहसंज्ञितो
भवेद्विकारः शिरसोऽर्द्धभेदकृत्" ॥

घ्राणञ्च मुखञ्च एकत्वं द्वन्द्वे । शिरसोऽर्द्धभेदकृत् अर्द्धावभेदकाख्यशिरोरोगकृत् ॥ * ॥

कृमिकर्णमाह ।

"यदा तु मूर्च्छन्त्यथवात्र जन्तवः
सृजन्त्यपत्यान्यथवापि मक्षिकाः ।
तदञ्जनत्वात् श्रवणो निरुध्यते
भिषग्भिराद्यैः कृमिकर्णको गदः" ॥

तदञ्जनत्वात् कृमिलक्षणत्वात् ॥ श्रवणे कृमिकर्णको गदो निरुध्यत इत्यन्वयः ॥ * ॥

पतङ्गादिषु कर्णप्रविष्टेषु लक्षणमाह ।

"पतङ्गाः शतपद्यश्च कर्णस्रोत्रं प्रविश्य हि ।
अरतिं व्याकुलत्वञ्च भृशं कुर्व्वन्ति वेदनाम् ॥
कर्णो निस्तुद्यते तस्य तथा फरफरायते ।
कीटे चरति रुक् तीव्रा निस्पन्दे मन्दवेदना" ॥
निस्पन्दे निश्चले ॥ * ॥ द्विविधकर्णविद्रधिमाह ।

"क्षताभिघातप्रभवस्तु विद्रधि-
र्भवेत्तथा दोषकृतोऽपरः पुनः ।
सरक्तपीतारुणमस्रमास्रवेत्
प्रतोदधूमायनदाहचोषवान्" ॥

क्षतप्रभवोघातप्रभवश्च तयोरुभयागन्तुजत्वादैक्यम् ॥ अस्रं आस्रावमित्यर्थः ॥ * ॥ कर्णपाकमाह ।
"कर्णपाकस्तु पित्तेन कोथविक्लेदकृद्भवेत्" ।
कोथः पूतिभावः । क्लेद आर्द्रता ॥ * ॥

पूतिकर्णमाह ।

"कर्णविद्रधिपाकाद्वा सकर्णो वारिपूरणात् ।
पूयं स्रवति यत् पूतिं स ज्ञेयः पूतिकर्णकः" ॥ * ॥

कर्णस्रावाद्भेदार्थमाह ।

पूतन्ति नियमेन पूति यथा स्यादेवं स्रवति ॥ * ॥

कर्णगतानां शोथार्ब्बुदार्शसां लक्षणान्याह ।

"कर्णशोथार्ब्बुदार्शांसि जानीयादुक्तलक्षणैः" ॥
कर्णशोथाश्च चत्वारो वातपित्तकफरक्तजाः ।
एवमर्शोऽपि चतुर्व्विधम् । अन्येषां शोथानामर्शसाञ्चात्रासम्भव आधारप्रभावात् ॥ अर्ब्बुदं सप्तविधम् । वातपित्तकफरक्तमांसमेदःसिराजम् ॥

एते कर्णरोगा अष्टाविंशतिः सुश्रुतोक्ता उक्ताः ॥*॥ इदानीं चरकोक्तकर्णरोगचतुष्टयं वातपित्तकफसन्निपातकृतमाह । तत्र वातजमाह ।

"नादोऽतिरुक् कर्णतले तु शोथः
स्रावस्तनुश्चास्रवणञ्च वातात्" ॥*॥

पित्तजमाह ।

"शोथः सरागो दरणं विदाहः
सपूतिपीतस्रवणञ्च पित्तात्" ॥ * ॥

कफजमाह ।

"वैश्रुत्य कण्डूस्थिरशोथशुक्ल-
स्निग्धस्रुतिस्वल्परुजः कफाच्च" ॥
वैश्रुत्यं अन्यथा स्रावणम् ॥ * ॥

त्रिदोषजमाह ।

"सर्व्वाणि रूपाणि च सन्निपातात्
स्रावश्च तत्राधिकदोषवर्णः" ॥ * ॥

कर्णपाल्याः सकर्णावयवत्वात् तद्विकारमप्यत्रैवाह । तत्र सनिदानं परिपोटकलक्षणमाह ॥
"सौकुमार्य्यात् चिरोत्सृष्टे सहसैवातिवर्द्धिते ।
कर्णशोथो भवेत् पाल्यां सरुजः परिपोटवान् ॥
कृष्णारुणनिभः स्तब्धः सवातात् परिपोटकः" ॥*॥

उत्पातमाह ।

"गुर्व्वाभरणसंयोगात् ताड़नात् घर्षणादपि ।
शोथः पाल्यां भवेत् स्रावो दाहपाकरुजान्वितः ॥
रक्तो वा रक्तपित्ताभ्यामुत्पातः स गदः स्मृतः" ॥*॥

उन्मन्थकमाह ।

"कर्णं बलाद्वर्द्धयतः पाल्यां वायुः प्रकुप्यति ।
कफं संगृह्य कुरुते शोथस्तब्धमवेदनम् ॥
उन्मन्थकः सकण्डूको विकारः कफवातजः" ।
अवेदनं ईषद्वेदनम् ॥ * ॥ दुःखवर्द्धनमाह ।
"संवर्द्धमाने दुर्व्विद्धे कण्डूदाहरुजान्वितः ।
शोथो भवति पाकश्च त्रिदोषो दुःखवर्द्धनः" ॥
संवर्द्धमाने दुर्व्विद्धे कर्ण इति शेषः ॥ * ॥

परिलेहिनमाह ।

"कफासृक् कृमयः क्रुद्धाः सर्षपाभा विसारिणः ।
कुर्व्वन्ति पिड़कां पाल्यां कण्डूदाहसमन्विताम् ॥
कफासृक्कृमिसम्भूतः स विसर्पान्वितस्ततः ।
लिह्यात् सशष्कुलीं पालीं परिलेही स च स्मृतः" ॥
स पीड़कात्मकः परिलेहिसंज्ञो गदः । लिह्यात् निर्मांसीकुर्य्यात् ॥ * ॥

अथ कर्णरोगाणां चिकित्सा ।

"कर्णशूले कर्णनादे बाधिर्य्ये क्ष्वेड़ एव च ॥
चतुर्ष्वपि च रोगेषु सामान्यं भेषजं स्मृतम् ।
शृङ्गवेरञ्च मधु च सैन्धवं तैलमेव च ।
कदुष्णं कर्णयोर्धार्य्यमेतत् स्याद्वेदनापहम्" ॥ १ ॥
"लशुनार्द्रकशिग्रूणां वारुण्या मूलकस्य च ।
कदल्याः स्वरसः श्रेष्ठः कदुष्णः कर्णपूरणे" ॥
वारुणी वरुणः ॥ २ ॥
"अर्काङ्कुरानम्लपिष्टान् सतैलान् लवणान्वितान् ।
सन्निदध्यात् सुधाकाण्डे कोरिते स्नुतयावृते ॥
पुटपाकक्रमस्विन्नं पीड़येद्रसागमात् ।
सुखोष्णं तद्रसं कर्णे प्रक्षिपेच्छूलशान्तये" ॥ ३ ॥
"अर्कस्य पत्रं परिणामपीत-
माज्येन लिप्तं शिखियोगतप्तम् ।
आपीड्य तस्याम्बुसुखोष्णमेव
कर्णे निषिक्तं हरतेऽतिशूलम्" ॥ ४ ॥
"तीव्रशूलातुरे कर्णे सशब्दे क्लेदवाहिनि ।
छागमूत्रं प्रशंसन्ति कोष्णं सैन्धवसंयुतम् ॥ ५ ॥
तैलं श्योणाकमूलेन मन्देऽग्नौ विधिना शृतम् ।
हरेदाशु त्रिदोषोत्थं कर्णशूलं प्रपूरणात् ॥ ६ ॥
हिङ्गुसैन्धवशुण्ठीभिस्तैलं सर्षपसम्भवम् ।
विपक्वं हरतेऽवश्यं कर्णशूलं प्रपूरणात् ॥ ७ ॥
कर्णशूले कर्णनादे बाधिर्य्ये क्ष्वेड़ एव च ।
पूरणं कटुतैलेन हितं वातघ्नमौषधम् ॥ ८ ॥
शिखरीक्षारजवारा तत्कृतकल्केन साधितं तैलम् ।
अपहरति कर्णनादं बाधिर्य्यञ्चापि पूरणतः" ॥
शिखरी अपामार्गः ॥ ९ ॥
"गवां मूत्रेण विल्वानि पिष्ट्वा तैलं विपाचयेत् ।
सजलञ्च सदुग्धञ्च तद्बाधिर्य्यहरं परम्" ॥
क्षीरमात्रं ग्राह्यम् । विल्वतैलम् ॥ १० ॥
"कर्णस्रावे पूतिकर्णे तथैव कृमिकर्णके ।
सामान्यं कर्म्म कुर्व्वीत योगान् वैशेषिकानपि ॥ ११ ॥
स्वर्जिकाचूर्णसंयुक्तवीजपूररसं क्षिपेत् ।
कर्णस्रावरुजा दाहास्तेन नश्यन्त्यसंशयम् ॥ १२ ॥
आम्रजम्बूप्रवालानां मधुकस्य वटस्य च ।
एभिस्तु साधितं तैलं पूतिकर्णगदं हरेत् ॥ १३ ॥
जातीपत्ररसे तैलं विपक्वं पूतिकर्णजित् ॥ १४ ॥
स्पष्टं रसाञ्जनं नार्य्याः क्षीरं क्षौद्रेण संयुतम् ।
प्रशस्यते चिरोत्थे तत् सस्रावे पूतिकर्णके ॥ १५ ॥
कुष्ठहिङ्गुवचादारुशताह्वाविश्वसैन्धवैः ।
पूतिकर्णापहं तैलं वस्तमूत्रेण साधितम्" ॥
कुष्ठादितैलम् ॥ १६ ॥
"शम्बूकस्य तु मांसेन कटुतैलं विपाचयेत् ।
तस्य पूरणमात्रेण कर्णनाड़ी प्रशाम्यति" ॥
शम्बूकाद्यं तैलम् ॥ १७ ॥

"चूर्णेन गन्धकशिलारजनीभवेन
सुष्ठ्यंशकेन कटुतैलपलाष्टके तु ।
धत्तूरपत्ररसतुल्यमिदं विपक्वं
नाड़ीं जयेच्चिरभवामपि कर्णजाताम्" ॥

सुष्ठिः पलम् । निशा तैलम् ॥ १८ ॥
"कृमिकर्णविनाशाय कृमिघ्नीं कारयेत् क्रियाम् ।
वार्त्ताकुधूमश्च हितः सार्षपस्नेह एव च ॥ १९ ॥
पूरणं हरितालेन गव्यमूत्रयुतेन च ।
धूपने कर्णदौर्गन्धे गुग्गुलुः श्रेष्ठ उच्यते ॥ २० ॥
चिकित्सा कर्णशोथानां तथा कर्णार्शसामपि ।
कर्णार्ब्बुदानां कुर्व्वीत शोथार्शोऽर्ब्बुदवद्भिषक्" ॥*॥

अथ कर्णपालीविकाराणां चिकित्सा ।

"पालीसंशोषणे कुर्य्यात् वातकर्णरुजक्रियाम् ।
स्वेदयेत्यत्नतस्ताञ्च स्विन्नां संवर्द्धयेत्तिलैः ॥ १ ॥
शतावरीवाजिगन्धापयस्यैरण्डवीजकैः ।
तैलं विपक्वं सक्षीरं पालीं संवर्द्धयेत् सुखम्" ॥
पयस्यत्र क्षीरकाकोली । शतावरीतैलम् ॥ २ ॥
"जीवनीयस्य कल्केन तैलं दुग्धेन पाचयेत् ।
चिकित्सेत्तेन तैलेन हताश्वं परिपोटकम् ॥ ३ ॥
शीतलेपैर्जलौकाभिरुत्पातं समुपाचरेत् ॥ ४ ॥